# shrIbhavamangalAShTakam

# श्रीभवमङ्गलाष्टकम्

## Document Information

Text title : bhavamangalAShTakam

File name : bhavamangalAShTakam.itx

Category : vishhnu, krishna, rAmAnujasampradAya, aShTaka, mangala

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Acknowledge-Permission: Shri Tripursundari Ved Gurukulam, Sahibabad (Ghaziabad), UP

Latest update : March 24, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 17, 2023

*sanskritdocuments.org*

shrIbhavamangalAShTakam

# श्रीभवमङ्गलाष्टकम्

श्रीरङ्गं करिशैलमञ्जनगिरीं शेषाद्रिसिंहाचलं
श्रीकूर्मं पुरुषोत्तमं च बदरीनारायणं नैमिषम् ।
श्रीमद्द्वारवतीप्रयागमथुरायोध्यागयापुष्करं
शालग्रामगिरिं निषेव्य रमते रामानुजोऽयं मुनिः ॥ १॥

सर्वेषां कृतिनां चरन्ति गुरवः कैङ्कर्यनिष्ठा हरेः
श्रीरामानुजयोगिनायकमणिः श्रीपादपद्मालयाः ।
भोग्याष्टाक्षरमन्त्ररत्नचरमश्लोकानुसन्धायिनो
वन्द्या भागवतोत्तमाः प्रतिदिनङ्कुर्वन्तु नो मङ्गलम् ॥ २॥

स श्रीमान्परमःपुमानथ चतुर्व्यूहावतारस्ततो
जाता व्यूहपरम्पराः सुरर्चिताः श्रीकेशवाद्याः पराः ।
एकाम्भोनिधिशेषभोगशयनन्यग्रोधपत्राश्रय-
क्षीरोदन्वदनन्ततल्पसुखदाः कुर्वन्तु नो मङ्गलम् ॥ ३॥

श्रीरामानुजयोगिपूर्णयमुनावास्तव्यमालाधराः
नाथः कारितनूजसैन्यपरमाः श्रीमांश्च नारायणः ।
चण्डाद्याः कुमुदादयः परिजना नित्याश्च मुक्ताश्च ये
श्रीवैकुण्ठनिवासिनोऽमरवराः कुर्वन्तु नो मङ्गलम् ॥ ४॥

मत्स्यः-कूर्म-वराह-मानवहरिः श्रीवामनो-भार्गवः
श्रीरामो-बलदेवदेवकिसुतौ-कल्की दशैते क्रमात् ।
अन्तर्याम्यथ योगिनां हृदयगोप्यर्चावताराः शुभाः
श्रीरङ्गादिसमस्तधामनिलयाः कुर्वन्तु नो मङ्गलम् ॥ ५॥

श्रीभूमिर्विमलादयो नवसुधापद्माधृताः शक्तयो
वेदा वेदवती धरापि च महालक्ष्मी सुकेशालया ।
देवी भार्गवभामिनी जनकजा सा रेवती रुक्मिणी
वेदाद्याःप्रभयान्विता दश रमाः कुर्वन्तु नो मङ्गलम् ॥ ६॥

शत्रुध्वंसि सुदर्शनं सुखकरं श्रीपाञ्चजन्यस्सदा
बाणाः शार्ङ्गममहर्षजनकं कौमौदकी नन्दकः ।
सत्पद्मं मुसलं हलं च परशुर्दिव्यायुधानि प्रभोः
सेनाधीशखगेशभोगिपतयः कुर्वन्तु नो मङ्गलम् ॥ ७॥

हंसो धर्मनिदर्शनो हरिमुखो यज्ञश्च धन्वन्तरिः
पाथोऽजोमिथुनोदितोहरिरलङ्कारः पृथिव्याः पृथुः ।
आद्यो वेदमुखश्च जन्मनिलयो नारायणो वै विराट्
श्वेतद्वीपनिवासिजीवहृदयः कुर्वन्तु नो मङ्गलम् ॥ ८॥

विष्वक्सेनमुनिर्ह्यनन्तमुनयः श्रीसम्प्रदायादिमा
येऽन्ये भूतभविष्यदृश्यसमये श्रीरङ्गभूभूषणाः ।
ये वै भागवताः सुखा दशगणा भृत्या नरा वानराः
श्वेतद्वीपनिवासिनो नरवराःकुर्वन्तु नो मङ्गलम् ॥ ९॥

इत्युक्तं भवमङ्गलाष्टकमिदं सुश्लोकसङ्कीर्तनं
श्रीमद्भागवतप्रसादजनकं श्रीवेङ्कटेशेन यत् ।
भक्ता ये प्रपठन्ति शुद्धमनसः प्रोत्फुल्लहृत्पङ्कजा-
स्तेषांवाञ्छितमङ्गलम्प्रकुरुते भक्तिप्रियो माधवः ॥ १०॥

इति श्रीभवमङ्गलाष्टकं सम्पूर्णम् ॥

Proofread by PSA Easwaran

*shrIbhavamangalAShTakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*